# E-Text

पत्रस्य नाम : लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्)

पत्रसंख्या : V

पाठ्यांशनाम : एचोऽयवायावः इत्यारभ्य धातोस्तन्निमित्तस्यैव इति यावत्

पाठ्यांशसंख्या : 3

पाठ्यांशस्य मुख्याः अंशाः :

1) एचोऽयवायाव इत्यत्र शेखरस्थो विचारः।
2) वान्तो यिप्रत्यये इत्यत्र शेखरस्थो विचारः।
3) गोर्यूतौ छन्दस्युपसंख्यानम्, अध्वपरिमाणे च - इति वार्तिकम्।
4) धातोस्तन्निमित्तस्यैव।

विषयसूची


1.0 : एचोऽयवायाव इत्यत्र शेखरस्थो विचारः

1.1 : उपोद्घातः

1.2 : स्थानेऽन्तरतम इति परिभाषया अत्र व्यवस्था

2.0 : वान्तो यिप्रत्यये इत्यत्र शेखरस्थो विचारः

2.1 : ओदौतोरिति वक्तव्यमिति वार्तिकम्

2.2 : गव्यम् इत्यादौ वलोपाभावः कथम्

3.0 : गौर्यूतौ च्छन्दस्युपसंख्यानम्, अध्वपरिमाणे च - इति वार्तिकम्

3.1 : तक्रकौण्डिन्यन्यायः

4.0 : धातोस्तन्निमित्तस्यैव


e-Pathshala पाठशाला A Gateway to all Post Graduate Courses

## 1.0 एचोऽयवायाव इत्यत्र शेखरस्थो विचारः

### 1.1 उपोद्घातः

एचोऽयवायावः वान्तो यि प्रत्यये धातोस्तन्निमित्तस्यैव क्षय्यजय्यौ शक्यार्थे क्रय्यस्तदर्थे - इति सूत्रैः, गोर्यूतौ च्छन्दस्युपसंख्यानम्, अध्वपरिमाणे च -इति वार्तिकाभ्याञ्च अय् अव् आय् आव् आदेशा विधीयन्ते।

एकारस्य अयादेशः। ओकारस्य अवादेशः। ऐकारस्य आयादेशः। औकारस्य आवादेश इति क्रमेण आदेशा भवन्ति।

एचोऽयवायावः

### 1.2 स्थानेऽन्तरतम इति परिभाषया अत्र व्यवस्था

शेखरे - इकोचि यणयवायावः, अवावौ यि प्रत्यये इति सूत्रयितुमुचितमित्याहुः। यथासंख्यसूत्रलब्धमर्थमाह - क्रमादिति। उदात्तादिगुणयुक्तानामन्यगुणक व्यावृत्तिस्तु स्थानेऽन्तरतमपरिभाषया बोध्या। एतदेवाभिप्रेत्य यथासंख्यसूत्रे भाष्ये प्रकृतसूत्रे स्थानेऽन्तरतमसूत्रेण व्यवस्थोक्ता संवृतावर्णस्य संवृतावर्णो विवृतावर्णस्य विवृतावर्ण इति।

एचः क्रमाद् अय् अव् आय् आव् आदेशाः स्युः अचि परे इति सूत्रार्थ उक्तः कौमुद्याम्। तत्र क्रमाद् इति पदेन यथासंख्यमनुदेशः समानामिति परिभाषायाः प्रवृत्तिरत्रेति सूचितम्। स्थानेऽन्तरतम इति परिभाषायाः प्रवृत्तिराश्रयणीयेति तु सिद्धान्तः। कथम्।

एचः चत्वारः, अयवायावः चत्वारः। तथाच समसम्बन्धिविधित्वात् यथासंख्यसूत्रेण निर्वाह इति पूर्वपक्षः। तथाहि - यथासंख्यमनुदेशः समानामिति सूत्रे किमुदाहरणम् इति प्रश्नस्य एचोऽयवायाव इति उत्तरं दत्तं भाष्ये।

**उत्तरपक्षः-**

उदात्तानुदात्तस्वरितानुनासिक्यगुणवशात् एचः षट् षट् विद्यन्ते। तथा अयवायावोऽपि। तेषां क्रमे विनिगमनाभावात् यथासंख्यसूत्रेण निर्वाहो न भवति। तस्माद् अवश्यं स्थानेऽन्तरतमपरिभाषयैव व्यवस्था वक्तव्या।

तत्र एकारे ओकारे च विद्यमानः अवयवभूतः अकारः संवृतः। ऐकारे औकारे च विद्यमानो विवृतः। एदैतोः यकारेण तालुस्थानतः साम्यमस्ति। ओदौतोः वकारेण ओष्ठस्थानतः साम्यम्। तस्माद् एकारस्य संवृताकारविशिष्टः अय् आदेशः। ओकारस्य तादृशः अव् आदेशः। ऐकारस्य विवृताकारविशिष्ट आय् आदेशः। औकारस्य विवृताकारविशिष्ट आव् आदेशः।

यथासंख्यसूत्रे किमुदाहरणमिति प्रश्नस्य एचोऽयवायाव इत्युत्तरं यदा दत्तं तदैवाह भाष्यकारः स्थानेऽन्तरतमसूत्रेणात्र व्यवस्थैति। एकारे ओकारे च विद्यमानस्य अकारस्य संवृतत्वमित्यादिविषये च यथासंख्यसूत्रभाष्यमेव प्रमाणम्।

**2.0 वान्तो यिप्रत्यये इत्यत्र शेखरस्थो विचारः**

**वान्तो यि प्रत्यये**

**शेखरे - येन विधिरित्यस्यापवादभूतया तस्मान्नुडचि इत्याद्यर्थमावश्यिक्या वाचनिक्या यस्मिन् विधिस्तदादवल्ग्रहणे इति वार्तिककृदुक्तपरिभाषया लभ्यमर्थमाह - यकारादाविति। यि प्रत्यये इत्यस्य यकारादौ प्रत्यये इत्यर्थः कथं सिध्यति -**

येन विधिस्तदन्तस्य इति परिभाषा विद्यते। तदनुसारेण अचो यत् इत्यादौ अच् = अजन्तः। अयं तदन्तविधिरित्युच्यते। यि प्रत्यये, तस्मान्नुडचि इत्यादौ तु यकारः = यकारादिः  अच् = अजादिः। तदन्तविधेः अपवादो भवति तदादिविधिः। तदन्तविधिविधायकं सूत्रं - येन विधिस्तदन्तस्य।

तदादिविधायकं वार्तिकम् - यस्मिन् विधिस्तदादावल्ग्रहणे। यत्र विशेषणत्वेन सप्तम्यन्ततया वर्णग्रहणं भवति तत्र तदादिविधिः - इति तस्याः परिभाषाया आशयः। ततोऽन्यत्र तदन्तविधिः।

2.1 ओदौतोरिति वक्तव्यमिति वार्तिकम्

**शेखरे - ओदौतोरिति। ओदौतोरिति वक्तव्यमिति वार्तिकमूलाद् व्याख्यानादिति भावः। पूर्वसूत्रे वान्तौ प्रति तयोरेव स्थानित्वनिर्णयात् इति स्थानेऽन्तरतमसूत्रस्थकैयटोक्तं तु न युक्तम्। वान्तज्ञानाय पूर्वसूत्रपर्यालोचनस्य आवश्यकत्वेपि तद्वाक्यार्थपर्यालोचने मानाभावात्। यथासंख्यसूत्रसहकारेण बोधोत्तरं तयोस्तत्त्वनिर्णयात्। अन्तरतमपरिभाषया निर्वाहे तु लक्ष्यपर्यालोचनकाले तन्निर्णयः। अत एव पूर्वसूत्रे स्थानिविशेषलाभो यथासंख्यसम्बन्धात्, इह तु निमित्ताभावात् तल्लाभाभावः इति षष्ठे प्रकृतसूत्रे कैयटः।**

वान्तः आदेशः नाम अव् आव्। तयोः स्थानिनौ ओदौतौ - इति कथं निर्णीयते। अस्मिन् विषये कैयटमतम् -

एचोऽयवायावः इति पूर्वसूत्रे अवादेशस्य ओकारः स्थानी, आवादेशस्य च औकारः स्थानी - इति दृष्टम्। तथाच तथैवात्रापि वान्तयोः अवावोः ओदौतावेव स्थानिनौ इति निश्चीयते।

**कैयटमतखण्डनम्** - वान्तो यि प्रत्यये इति सूत्रे वान्त इत्युक्तम्। वकारः अन्तो यस्य सः वान्तः। न केवलम् अव् आव् इव् ईव् उव् इत्यादयः सर्वेपि वान्ताः। एवं सति, सूत्रस्थेन वान्तपदेन किं ग्राह्यम् इत्याकांक्षायाम् एचोऽयवायाव इति पूर्वसूत्रे अवावोर्ग्रहणात् अत्रापि तावेव इति निश्चेतुं शक्यते। अस्मिन् सूत्रे वान्तपदस्य अवावौ इत्यर्थं प्रति पूर्वसूत्रसाहचर्यं विनिगमकम्।

तथाच - यकारादौ प्रत्यये परे अवावौ आदेशौ स्तः इत्यर्थो लब्धः। पुनः संशयः- कयोः स्थाने इति। तदा पूर्वसूत्रस्य कोऽर्थ इति पर्यालोचनीयम्। ओकारस्य अवादेशः औकारस्य आवादेश इति यथासंख्यसूत्रेण वा स्थानेऽन्तरसूत्रेण वा तत्र निर्णीयते। तदनुसारेण अत्रापि ओदौतावेव स्थानिनौ इति निर्णेतव्यम् -इति कैयटाशयः।

परन्तु - एकसूत्रार्थज्ञानम् अन्यसूत्रार्थज्ञानाधीनम् - इत्येषा रीतिः अन्यत्र न दृष्टा। तस्मात् अस्मिन् सूत्रे स्थानिनौ कौ इत्याकांक्षायाम् ओदौतोरिति वक्तव्यम् इति वार्तिकादेव ओदौतौ इति निश्चीयते - इति नागेशः।

एतच्च कैयटस्यापि सम्मतम्। प्रकृतसूत्रे कैयटेनैव तदुक्तं यथा- एचोऽयवायाव इत्यत्र यथासंख्यपरिभाषया अवावोः ओदौतौ स्थानिनौ इति लभ्यते। अत्र तु यथासंख्यादिनिमित्ताभावात् अवावोः स्थानिनौ कौ इति निर्णेतुं न शक्यते - इति।

**2.2 गव्यम् इत्यादौ वलोपाभावः कथम्**

तस्य विकार इत्यर्थे गोपयसोर्यत् इति सूत्रेण गोशब्दात् यत्प्रत्यये कृते गो यत्। अनेन सूत्रेण ओकारस्य अवादेशे गव् यत्। अत्र अवर्णपूर्वयोः पदान्तयोः यवयोर्वा लोपः स्यादशि इत्यर्थकेन "लोपः शाकल्यस्य" इति सूत्रेण वलोपः कथं न भवतीति प्रश्नः।

**उत्तरम्** – "यचि भम्" इति सूत्रानुसारेण यति परे गव् इत्यस्य भसंज्ञा विद्यते। तथाच पदसंज्ञाया अभावात् वकारस्य पदान्तत्वाभावात् न लोपः।

**पदकृत्यविचारः -**

यि इति पदं सूत्रे मास्तु, वान्तः प्रत्यये इत्येवास्तु, को दोषः -गोभ्यामित्यादौ भकारादिप्रत्यये परेऽपि अवादेशः स्यात्। प्रत्यये इति पदं सूत्रे मास्तु, वान्तो यि इत्येवास्तु, को दोषः – गो-यानम् इत्यादावपि अवादेशः प्राप्नोति।

### 3.0 गोर्यूतौ च्छन्दस्युपसंख्यानम्, अध्वपरिमाणे च

**क) वार्तिकार्थः**

गोशब्दस्य यूतिशब्दे परे वान्तादेशः स्यात् वेदे, अध्वपरिमाणविशेषरूपेऽर्थे लोके वेदे च।

**ख) गव्यूतिरित्यत्र वकारलोपवारणं कथम्**

**गव्यूतिः** - (ग् (अव्)) यूतिः -इत्यत्र अवर्णपूर्वः पदान्तः वकारः। तस्य, हलि सर्वेषाम् - इति सूत्रेण, लोपः शाकल्यस्य -इति सूत्रेण वा लोपः प्राप्नोति। स कथं वार्यते।

**उत्तरम्** - वान्तो यि प्रत्यये इति सूत्रे (व् वान्तो यि प्रत्यये) इति वकारोपि प्रश्लिष्टो विद्यते। स च लोपो व्योर्वलि इति सूत्रेण लुप्तत्वान्न श्रूयते। तथाच - वकारविशिष्टः वकारान्तः आदेशः स्यादित्यर्थः। एकस्मिन् वकारे लुप्तेपि द्वितीयः वकारः श्रूयेत एव। अन्यथा वकारद्वयविधानं व्यर्थं स्यात्।

सूत्रस्थं वकारप्रश्लेषसहितं वान्तपदमेव गोर्यूतौ छन्दस्युपसंख्यानमिति वार्तिके अनुवर्तते।

**ग) अत्र विचारः**

व् वान्तो यिप्रत्यये इत्यवस्थायां वकारस्य वकारे(वलि) परे लोपो व्योर्वलि इति सूत्रेण लोप इत्युक्तम्। तथाहि - कार्यी वकारः, निमित्तमपि वकारः। तत्र आक्षेपः - लोपो व्योर्वलि इति सूत्रे - वकारयकारौ कार्यिणौ। वल्प्रत्याहारान्तर्गतो वर्णो निमित्तम्। वल्प्रत्याहारे वकारोऽप्यस्ति। तथाच वकारस्य कार्यित्वं निमित्तत्वञ्चास्ति। तत्र वकारस्य निमित्तत्वं सामान्यम्, रेफादीनामप्यस्तीति कृत्वा। कार्यित्वं तु वल्प्रत्याहारान्तर्गतवर्णेषु वकारस्यैवास्तीति कृत्वा विशेषः। तथाच

उत्सर्गापवादन्यायेन वकारस्य यत् विशेषसिद्धं कार्यित्वं तेन सामान्यसिद्धं निमित्तत्वं बाध्यते।

**समाधानम्** - वकारस्य कार्यित्वं विशेषोक्तमपि न अनवकाशम्। आस्रेमा जीरदानुरित्यादौ यत्र वकारस्य निमित्तत्वं नास्ति तत्र कार्यित्वस्य अवकाशः। यदि विशेषः अनवकाशः तर्ह्येव सामान्यं बाधते, नान्यथा।

**घ) बाध्यबाधकभावविषये विचारः**

**"ब्राह्मणा भोज्यन्ताम् - माठरकौण्डिन्यौ परिवेविषाताम्"**

इति वाक्यद्वये प्रथमवाक्यप्राप्तं माठरकौण्डिन्ययोः भोजनं द्वितीयवाक्योक्तेन परिवेषणेन बाध्यते। न हि भोजनपरिवेषणे एककर्तृके युगपत् संभवतः। असम्भवे च, यदि माठरकौण्डिन्यावपि भोज्येयातां तर्हि परिवेषणवाक्यं सर्वथा निरवकाशं स्यात्। ब्राह्मणभोजनवाक्यं तु अन्यब्राह्मणेषु सावकाशम्। एवञ्च असम्भवपूर्वकं निरवकाशत्वं बाधबीजम्। "ब्राह्मणेभ्यो दधि दीयताम् - कौण्डिन्याय तक्रं दीयताम्" इति वाक्यद्वये प्रथमवाक्यप्राप्तं कौण्डिन्यसम्प्रदानकं दधिदानं द्वितीयवाक्योक्तेन तक्रदानेन बाध्यते। यद्यपि दधिदानात् पूर्वं पश्चाद्वा तक्रदानं सम्भवति तथापि न हि लोके ईदृशवाक्यस्थले दधिदानं दृश्यते। दधिदानं तु अन्यब्राह्मणेषु सावकाशम्। तस्मात् तदेवोत्सर्गवाक्यम्। तक्रदानं कौण्डिन्ये एव सावकाशम्। तस्मात् सोपवादः। उत्सर्गवाक्ये अनुष्ठिते अपवादवाक्यस्य सम्भवे सत्यपि अपवादेनोत्सर्गस्य बाध एव लोके दृश्यते। प्रकृते - "सर्वेषां वलां निमित्तत्वं - वकारस्य कार्यित्वम्" इति वाक्यद्वये प्रथमवाक्यप्राप्तं निमित्तत्वं द्वितीयवाक्योक्तेन कार्यित्वेन कुतो न बाध्यते? कार्यित्वस्य निमित्तत्वानाक्रान्ते आस्रेमा इत्यादौ सावकाशत्वात्। अस्तु तर्हि - यथा

तक्रकौण्डिन्यन्याये पश्चात् पूर्वं वा सावकाशेन तक्रदानेन दधिदानं बाध्यते एवं निमित्तत्वेन कार्यित्वं कुतो न बाध्यते? पश्चात् पूर्वं वा यत् सावकाशत्वं न तावता बाधाभावो भवति। किन्तु यदि तदप्राप्तियोग्ये अचारितार्थ्यं भवति तर्हि पूर्वं पश्चाद्वा सावकाशत्वे सत्यपि बाधो भवत्येव। तादृशस्थलेष्वेव तक्रकौण्डिन्यन्यायो भाष्यकारेण सञ्चारितः। प्रकृते तदप्राप्तियोग्ये (निमित्तत्वानाक्रान्ते स्थले) कार्यित्वस्य चारितार्थ्यं वर्तते। तस्मान्न कार्यित्वेन निमित्तत्वं बाध्यते।

**3.1 तक्रकौण्डिन्यन्यायः**

अयं न्यायः

1) अनवकाशविषयः

2) विधेयविषयश्च।

**न्यायस्य अनवकाशविषयता -**

तद्धितेष्वचामादेः इति सूत्रे , जगत् अण् -इति स्थिते 1.अत उपधाया इति सूत्रेण उपधावृद्धिः, 2.तद्धितेष्वचामादेरिति सूत्रेण आदिवृद्धिश्च प्राप्नोति , तत्र यद्यपि आदिवृद्धेः पूर्वं वा पश्चाद्वा उपधावृद्धिः कर्तुं शक्यते तथापि सत्यपि सम्भवे बाधनं भवति, यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्युक्ते तक्रदानं दधिदानस्य निवर्तकं भवति लोके एवं प्रकृतेपि उपधावृद्धिं बाधित्वा आदिवृद्धिः प्रवर्तते। इत्यशयकं भाष्यं विद्यते। तत्र स्पष्टमुक्तं - नाप्राप्ते दधिदाने तक्रदानमारभ्यते, तत्प्राप्त आरभ्यामाणं बाधकं भवति इति। येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति इति वचनं समर्थयति तक्रकौण्डिन्यन्यायः इति ततो ज्ञायते। तदप्राप्तियोग्ये अचारितार्थ्यं यत्रास्ति तत्रैव येन नाप्राप्तन्यायः तक्रकौण्डिन्यन्यायो वा प्रवर्तते।

athshala पाठशाला A Gateway to all Post Graduate Courses

**न्यायस्य विधेयविषयता**

तक्रकौण्डिन्यन्यायो विधेयविषयः। न हि लोपो व्योर्वलीति सूत्रेण वकारस्य निमित्तत्वं विधीयते। यदि वकारस्य निमित्तत्वं विधेयं तर्हि विशेषविहितेन कार्यित्वेन सामान्यविहितं निमित्तत्वं बाध्यत इति वक्तुं शक्यते। कथं ज्ञायते तक्रकौण्डिन्यन्यायो विधेयविषय इति। नित्यं कौटिल्ये गतौ इति सूत्रे भाष्ये विधेयविषयतया स न्यायः प्रवर्तितः। तथाहि - 1. धातोरेकाचो हलादेः क्रियासमभिहारे यङ्, 2. नित्यं कौटिल्ये गतौ, 3. लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् - इति सूत्रत्रयेण यङ् विधीयते। तत्र वार्तिकद्वयं पठ्यते -

1) उत्तरयोश्च विग्रहेण विशेषासम्प्रत्ययात् नित्यग्रहणानर्थक्यम्

2) क्रियासमभिहारे च नैतेभ्यः - इति च।

**तत्र प्रथमवार्तिकाशयः** - जङ्गम्यते इत्यादियङन्तप्रयोगे सति योऽर्थविशेषः प्रतीयते न स कुटिलं गच्छति इत्यादिवाक्यप्रयोगे सति प्रतीयते। तथाच गमनकौटिल्यविवक्षायां यङन्तप्रयोग एव कर्तव्यः, न वाक्यम्। एवञ्च सूत्रे नित्यग्रहणमनावश्यकम् - इति।

**द्वितीयवार्तिकाशयः** - अत्र पूर्ववार्तिकात् विशेषासम्प्रत्ययादित्यनुकृष्यते। तथाच - लुपसदादिभ्यः धातुभ्यः क्रियासमभिहारे यङ् नैवोत्पद्यते - कुतः - विशेषासम्प्रत्ययात्। न हि जञ्जप्यते इति प्रयोगात् भृशं जपतीत्यादिरर्थविशेषः प्रतीयते। जञ्जप्यते इत्यादियङन्तप्रयोगात् हि जपगर्हा प्रतीयते, न तु जपस्य भृशत्वम्। तथाच भृशं जपतीत्यर्थे जञ्जप्यते इति यङन्तप्रयोगनिवारणार्थं (भावगर्हायामेव यङ् इत्यर्थसिध्यर्थम्) अपि नित्यग्रहणमनावश्यकम् - इति।

कौटिल्यविशिष्टे गर्हाविशिष्टे च अर्थे यदा गत्यर्थका लुपसदादयश्च धातवो वर्तन्ते तदा तेभ्यः यङ् - इति द्वितीयतृतीयसूत्राभ्यां विधीयते। ताभ्यां हि

Pathshala पाठशाला A Gateway to all Post Graduate Courses

कौटिल्यगर्हारूपावर्थविशेषौ न विहितौ, किन्तु तावनूद्य यङ् विधीयते। क्रियासमभिहारविशिष्टे अर्थे यदा यो धातुः वर्तते तदा तस्मात् यङ् - इति प्रथमसूत्रेणापि क्रियासमभिहाररूपमर्थविशेषमनूद्य यङ् विहितो, नार्थविशेषो विहितः।

यदि अनुवादविषयेऽपि येननाप्राप्तिन्यायस्य तक्रकौण्डिन्यन्यायस्य वा सञ्चारः स्यात् तर्हि - क्रियासमभिहारे नैतेभ्यः -इत्येव वार्तिककृता उक्तं स्यात्, न तु - क्रियासमभिहारे च नैतेभ्यः - इति चकारसहितम्। लुपसदादिभ्यो भावगर्हायां यङ् विधीयते। सर्वेभ्यो धातुभ्यः क्रियासमभिहारे यङ् विधीयते। तत्र लुपसदादिभ्योन्यत्र भावगर्हायां विहितस्य यङः अचारितार्थ्यात् क्रियासमभिहारे यङोभावार्थं नित्यग्रहणमनावश्यकम्। एवञ्च तक्रकौण्डिन्यन्यायमनाश्रित्य चकारमुच्चार्य वार्तिककृता विषयोऽयं प्रतिपादितः। तस्मात् अनुवादविषये तक्रकौण्डिन्यन्यायस्य सञ्चारो नास्तीति ज्ञायते।

**वार्तिके वकारप्रश्लेषः** - यकारादौ प्रत्यये परे कुत्रापि पदसंज्ञाया अभावात् सूत्रे वकारप्रश्लेषस्य सूत्रीयोदाहरणेषु प्रयोजनं नास्ति। अतः वार्तिके एव वाकारप्रश्लेषकल्पनमुचितम्। तथाहि - गोर्यूतौ व् छन्दस्युपसंख्यानम् -लोपो व्योर्वलि इत्यनेन वकारलोपे, गोर्यूतौ छन्दस्युपसंख्यानम् - इति।

**वकारप्रश्लेषखण्डनम्** - नागेशस्तु वकारप्रश्लेषोऽनावश्यक इत्याह। तथाहि -

1) लोपो व्योर्वलि -इति सूत्रे भाष्यकृता वकारः प्रत्याख्यातः। तदनुसारेण, वलि परे यकारस्य लोप इत्येव भाष्यकाररीत्या सूत्रार्थो लभ्यते। तस्मात् प्रश्लेषणीयस्य वकारस्य लोपः, लोपो व्योर्वलि इत्यनेन वक्तुं न शक्यते।
2) तर्हि गव्यूतिपदे लोपः शाकल्यस्येति सूत्रेण वा हलि सर्वेषामिति सूत्रेण वा यलोपः प्राप्नोति, तस्य किं समाधानमिति चेत् - गोर्यूतौ छन्दस्युपसंख्यानम् इति वार्तिकेन च्छान्दसं गव्यूतिपदं निष्पाद्यते। सर्वे विधयश्छन्दसि विकल्पेन

भवन्ति। अतः लोपः शाकल्यस्य इत्यादियलोपविधिः गव्यूतिपदे न प्रवर्तते इति स्वीकर्तुं शक्यते।

3) अध्वपरिमाणे च इत्यनेन यत् लौकिकं गव्यूतिपदं तत्र यलोपवारणं कथम् इति चेत् - य एव च्छान्दसो गव्यूतिशब्दः स एव लोके अध्वपरिमाणविशेषेऽर्थे संज्ञात्वेन विनियुज्य रूढिमागतः। संज्ञाशब्दानां विषयेऽपि - विद्यमाना या आनुपूर्वी सा शास्त्रेण केवलमनुविधीयते। न हि गोपदं यूतिपदञ्च योजयित्वा आधुनिकैः स शब्दो निर्मितः। तस्मात् वकाररहितः स शब्दः अध्वपरिमाणविशेषेऽर्थे संज्ञा भवितुं नार्हतीति कृत्वा लोपो न भविष्यति।

4) यथा - यदा रघुनाथशब्दः कस्यचित् संज्ञा तदा पूर्वपदात् संज्ञायामगः इति सूत्रेण णत्वं प्राप्नोति। परन्तु संज्ञात्वम् अपगच्छतीति भिया णत्वं न क्रियते शिष्टैः।

**4.0 धातोस्तन्निमित्तस्यैव**

**सूत्रार्थः -**

एचोऽयवायावः, वान्तो यि प्रत्यये -इति सूत्राभ्याम् एचः वान्तः यि प्रत्यये इति पदान्यनुवर्तन्ते। यि प्रत्यये धातोः तन्निमित्तस्यैव एचः वान्तादेशः - इति सूत्रार्थः।

**उदाहरणम् -** लव्यम्, अवश्यलाव्यम्। प्रत्युदाहरणम् - ओयते, औयत।

**विचारः - 1**

**शेखरे - धातोरित्यस्याभावे प्रतिपदिकमात्रविषयो नियमः स्यात् तथाच गव्यमित्यत्र न स्यात् , ओयते इत्यत्र च स्यात्। तदभावे सामान्यतो नियमापादनन्तु योगविभाग-एवकार-वैयर्थ्यापत्तेरयुक्तम्। तन्निमित्तस्य चेद्धातोरेवेति नियमे बाभ्रव्यासिद्धेः तद्वारणाय एवकारः।**

तन्निमित्तस्यैव - इति सूत्रमस्तु। को दोषः? - इति प्रश्नः।

**उत्तरम्** - 1. धातोरिति पदस्याभावे यदि - यकारादौ प्रत्यये परे तन्निमित्तस्यैव एचो वान्तादेशः स्यात् - इति सूत्रार्थो विवक्षितः स्यात् तर्हि - वान्तो यि प्रत्यये तन्निमित्तस्य - इत्येव सूत्रितं स्यात्। पृथक्सूत्रकरणं , एवकारश्च वृथा स्यात्। यदि च,

2. यकारादौ प्रत्यये परे प्रातिपदिकस्य तन्निमित्तस्यैव एचो वान्तादेशः स्याद् - इति सूत्रार्थः विवक्षितः तदा - गो यत्, नौ यत् इत्यादौ ओदौतोः यत्प्रत्ययनिमित्तकत्वा-भावात् तत्र सूत्रं न प्रवर्तेत। किञ्च, आङ् वेञ् यक् ते - आ ऊयते - ओयते। अत्र वान्तो यि प्रत्यये इत्यनेन अवादेशः प्राप्नोति, तन्निमित्तस्यैव इति नियमेन प्रातिपदिकस्थले एव अतन्निमित्तव्यावृत्तिः सिध्येत्। तथाच धातुस्थले अतन्निमित्तस्यापि अवादेशः प्राप्नोति। तस्मात् धातुपदमावश्यकमेव।

**विचारः - 2**

सिद्धे सत्यारभ्यमाणो योगो नियमाय भवति - इति न्यायेन धातोस्तन्निमित्तस्य इत्येव सूत्रमस्तु। लव्यम् इत्यादौ हि वान्तो यि प्रत्यये इत्यनेनैव वान्तादेशः सिद्धः। तथाच एवकारं विनैव नियमत्वे सिद्धे एवकारः किमर्थः?

**उत्तरम्** - धातोस्तन्निमित्तस्य -इति चेत् सूत्रं तर्हि यद्यपि नियमसूत्रत्वं सिध्येदेव तथापि -

1. धातोः एचः वान्तादेशश्चेत् तन्निमित्तस्यैव

2. तन्निमित्तस्य वान्तादेशश्चेत् धातोः एच एव -इत्येवं द्विधा नियमाकारसम्भवे विनिगमनाविरहात् कदाचिद् द्वितीयं नियमस्वरूपं गृह्येत। ततश्च- बभ्रु यत् - बाभ्रो

यत् - बाभ्रव्य इत्यादौ वान्तादेशो न सिध्येत्। एवकारे कृते तु धातोरेचो वान्तादेशो भवति चेत् तन्निमित्तस्यैव इति यत्र एवकारसम्बन्ध आवश्यकः तत्रैव सूत्रकारेण एवकारः प्रयुक्त इति कृत्वा द्वितीयं नियमस्वरूपं नैव भविष्यति।

**विचारः - 3**

आङ् वेञ् यक् ते - आ ऊयते - ओयते इत्यादौ धातूपसर्गयोः आद्गुण इति सूत्रेण कृतो गुणो बहिरङ्गः, यकारादिप्रत्ययनिमित्तकः अवादेशस्तु अन्तरङ्गः। तथाच असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषया गुणस्य असिद्धत्वात् अवादेशो न भविष्यति। तस्मात् ओयते इति प्रत्युदाहरणं न युक्तम्। औयते इति तु युक्तमुदाहरणम्। तथाहि - वेञ् लङ्(कर्मणि) - वेञ् यक् त - ऊ य त - आट् ऊ य त। आटश्च इति सूत्रेण वृद्धिः एकादेशः। औ य त। अत्र औकारस्य यकारादिप्रत्ययनिमित्तकत्वाभावात् आवादेशो नास्ति।

बभ्रु यत् - बाभ्रु यत्। ओर्गुण इति सूत्रेण उकारस्य गुण ओकारः। बाभ्रो यत्। तच्च सूत्रं यत्प्रत्ययं निमित्तीकृत्य प्रवर्तत इति कृत्वा यकारादिप्रत्ययनिमित्तक ओकारः। तस्यानेन अवादेशे बाभ्रव् य इति सिध्यति।

गो यत्, नौ यत् - इत्यादौ तु यकारादिप्रत्ययनिमित्तको न ओकार औकारो वा। तस्मात्तादृशे स्थले वान्तादेशो न सिध्येत्। आ वेञ् यक् ते - आ ऊयते - ओयते। अत्र ओकारो न यकारादिप्रत्ययनिमित्तकः।

epathshala
पाठशाला
A Gateway to all Post Graduate Courses